“ओकारं चञ्चलापाङ्गि! पञ्चदेवमयं सदा ।
रक्तविद्युल्लताकारं त्रिगुणात्मानमीश्वरम् ॥
पञ्चप्राणमयं वर्णं नमामि देवमातरम् ।
एतद्वर्णं महेशानि स्वयं परमकुण्डली” ॥

इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—

“वामतः कुण्डली भूत्वा दक्षान्मध्ये तु कुञ्चिता ।
किञ्चिद्दक्षगता या तु कुञ्चिता वामतस्त्वधः ॥
ब्रह्मेशविष्णवस्तास मात्रा तु ब्रह्मरूपिणी ।
शक्तिश्च परमा सैव ध्यानमस्य प्रवक्ष्यते” ॥

इति वर्णोद्धारतन्त्रम् ॥ * ॥ तस्य नामानि यथा,—

“ओकारः सत्यपीयूषौ पश्चिमास्यः श्रुतिः स्थिरा ।
सद्योजातो वासुदेवो गायत्री दीर्घजङ्घकः ।
आप्यायनी चोर्द्धदन्तो लक्ष्मीर्वाणी सुखी द्विजः ॥
उद्देश्यदर्शकस्तीव्रः कैलासो वसुधाक्षरः ।
प्रणवांशो ब्रह्मसूत्रमग्नेशः सर्व्वमङ्गला ॥
त्रयोदशी दीर्घनासा रतिनाथो दिगम्बरा ।
त्रैलोक्यविजया प्रज्ञा प्रीतिर्वीजादिकर्षिणी” ॥

इति तन्त्रशास्त्रम् ॥ (अनुबन्धविशेषः । यथाह कविकल्पद्रुमे । “श्वयेजादिः स्वादोर्निष्ठातन ओर्निट्” ॥ तेन ओ दी क्षये इत्यस्मात् क्तायां निष्ठायां दीनं दीनवत् इति स्यात् ॥ मातृकान्यासे ऊर्द्धदन्तपङ्क्तौ न्यस्ततया तदाख्ययाप्यभिधानम् । मातृकान्याससमन्त्रो यथा,—

“ॐ नम ऊर्द्धदन्तपङ्क्तौ औं नमऽधोदन्तपङ्क्तौ” ॥)

ओ, व्य, सम्बोधनम् । आह्वानम् । स्मरणम् । अनुकम्पा । इति मेदिनी ॥

ओँ, व्य, ओम् । प्रणवः । इति वेदागमौ ॥

ओः, पुं, ब्रह्मा । इत्येकाक्षरकोषः ॥

ओकं, क्ली, (उचेरिगुपधलक्षणे के गुणः कुत्वञ्च “ओक उचः के” । ७ । ३ । ६४ । इति निपात्यते ।) गृहम् । आश्रयः । इत्यमरटीकायां भरतादयः ॥ (पुं । पक्षी । वृषलः ॥)

ओकः, [स्] क्ली, (उच्यते समवैति अस्मिन् । उच + असुन् । गुणः । न्यङ्क्वादित्वात् कुत्वम् ॥) आश्रयः । गृहम् । इत्यमरः ॥ (“जलौका अथ भल्लूके” । इति अमरकोषः । तथा विष्णुपुराणम् १ । ६ । ३७ ।

“सप्तर्षीणान्तु यत् स्थानं स्मृतं तद्वै वनौकसाम्” ॥)

ओकणः, पुं, केशकीटः । इति शब्दरत्नावली ॥ उकुण् इति भाषा ॥

ओकणिः, पुं, यूकः । इति शब्दरत्नावली ॥ उकुण् इति भाषा ॥

ओकुलः, पुं, (उच् + उलच् । निपातनात् सिद्धम् ।) गोधूमक्षततमापक्वः । अस्य गुणाः । गुरुत्वम् । वृष्यत्वम् । मधुरत्वम् । बलकारित्वम् । रक्तवातापहत्वम् । स्निग्धत्वम् । हृद्यत्वम् । मदविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

ओकोदनी, स्त्री, (ओकः मस्तकरूपाश्रयस्थानमदनं भक्ष्यं यस्याः ।) यूकः । इति शब्दरत्नावली ॥

ओक्कणी, स्त्री, (ओच् + कण् + अच् + ङीप् ।) ओकणः । इति शब्दरत्नावली । उकुण इति भाषा ॥

ओख, ऋ, शोषणे । भूषणे । सामर्थ्ये । निवारणे । इति कविकल्पद्रुमः ॥ (भ्वादिं-अकं-सकं च परं-सेट् ।) ऋ मा भवान् ओचिखत् । अत्र दित्वात् प्राक् प्राप्तो ह्रस्व ऋदित्वान्न स्यात् । शोषः स्नेहरहितीभावः । ओखति पङ्कं आतपात् । अलमर्थो भूषणं सामर्थ्यं वारणञ्च । इति दुर्गादासः ॥

ओघः, पुं, (उच् समवाये + घञ् । पृषोदरादित्वात् साधुः ।) द्रुतनृत्यगीतवाद्यम् । समूहः । इत्यमरः ॥ जलवेगः । (यथा कुमारे ४ । ४४ ।

“रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी” ॥) परम्परा । उपदेशः । इति मेदिनी ॥

ओङ्कारः, पुं, (ओम् + कारप्रत्ययः ।) प्रणवः । इत्यमरः ॥ (यथाह स्मृतिः ।

“ओङ्कारः पूर्व्वमुच्चार्य्यस्ततो वेदमधीयते” ।
“ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्य्यातौ तस्मान्माङ्गलिकावुभौ” ।

इति व्याकरणटीकायां दुर्गादासः ।

“प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति” ॥

इति मनुः । २ । ७५ ॥ अत्राह आपस्तम्बः,

“ओङ्कारः स्वर्गद्वारं तद्ब्रह्म अध्येष्यमाण एतदपि प्रतिपद्येत विकथां चान्यां कृत्वा एवं लौकिक्या वाचा व्यावर्त्तते” । लौकिक्या वाचा व्यावर्त्तते तया मिश्रितं न भवतीत्यर्थः ।)

ओङ्कारा, स्त्री, बुद्धशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

ओज त्क, बले । तेजसि । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-अकं-सेट् ।) मा भवान् ओजिजत् ! इति दुर्गादासः ॥

ओजः, [स्] क्ली, (उब्जत्यनेन । उब्ज आर्जवे उब्जेर्बले “बलोपश्च” ४।१९१ । उणादिः असुन् । बलोपश्च । गुणः ।) दीप्तिः । अवष्टम्भः । प्रकाशः । बलम् । इति मेदिनी ॥ (यथा रघौ २ । ५४ ।

“रुद्रौजसा तु प्रहृतं त्वयास्याम्” । यथा च मानवे १ । १९ ।

“तेषामिदन्तु सप्तानां पुरुषाणां महौजसाम्” ॥)

प्रथमतृतीयपञ्चमसप्तमनवमैकादशराशयः । इति ज्योतिषम् ॥ गौड़ी रीतिः काव्यगुणः । तस्य लक्षणम् । बहुसमाससंयुक्तवर्णपदाड़म्बरः । यथा,

“ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः ।
गौड़वैदर्भपञ्चालीरीतयः परिकीर्त्तिताः ॥
ओजः समासभूयस्त्वं मांसलं पदडम्बरम्” ।

तस्योदाहरणम् यथा,—

“गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणिस्फुर्जत्स्फुत्कृतिभीतिसम्भृतचमत्कारस्फुरत्सम्भ्रमा ।
आनन्दामृतवापिकां विदधती चित्तं गिरीशप्रभोस्त्वां पायान्नवसङ्गमे भगवती लज्जावती पार्व्वती” ॥

इति काव्यचन्द्रिका ॥ * ॥ रसादिसप्तधातुसारभागजधातुविशेषः । तस्य गुणाः । सर्व्वशरीरस्थितत्वम् । स्निग्धत्वम् । शीतलत्वम् । स्थिरत्वम् । शुक्लवर्णत्वम् । कफात्मकत्वम् । शरीरस्य बलपुष्टिकारित्वञ्च ॥

“हृदि तिष्ठति यच्छुद्धं रक्तमीषत् सपीतकम् ।
ओजः शरीरे संजातं तन्नाशान्नाशमृच्छति ॥
भ्रमरैः फलपुष्पेभ्यो यथा संभ्रियते मधु ।
तद्वदोजः शरीरेभ्यो धातुः संभ्रियते नृणाम्” ॥

इति वैद्यकम् ॥ ओजोऽदन्तोऽपि । इति भरतः ॥

“हृदयं चेतनास्थानमोजसश्चाश्रयं मतम्” ।

इति पूर्व्वखण्डे । ५अ । शार्ङ्गधरेणोक्तम् ॥

“तत्परस्यौजसः स्थानं तत्र चैतन्यसंग्रहः” ॥
“ओजोवहाः शरीरे वा विधम्यन्ते समन्ततः ।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः ॥
यदृते सर्व्वभूतानां जीवितं नावतिष्ठते ।
यत्सारमादौ गर्भस्य योऽसौ गर्भरसाद्रसः ॥
संवर्त्तमानं हृदयं समाविशति यत्पुरा ।
यस्य नाशान्न नाशोऽस्ति धारि यद्धृदयाश्रितम् ॥
यच्छरीररसं देहः प्राणा यत्र प्रतिष्ठिताः ।
तत्फला विविधा वाताः फलन्तीति महाफलाः ॥
ध्मानाद्धमन्यः स्रवणात् स्रोतांसि सरणात्सिराः ॥
तन्महत्ता महामूलास्तच्चौजः परिरक्षता ।
परिहार्य्या विशेषेण मनसा दुःखहेतवः ॥
हृद्यं यत्स्याद्यदौजस्यं स्रोतसां यत्प्रसादजम् ।
तत्तत्सेव्यं प्रयत्नेन प्रशमो ज्ञानमेव च” ॥

इति सूत्रस्थाने त्रिंशेऽध्याये चरकेणोक्तम् ॥

“गुरु शीतं मृदु श्लक्ष्णं बहुलं मधुरं स्थिरम् ।
प्रसन्नं पिच्छिलं स्निग्धं ओजो दशगुणं तथा” ॥
मद्यसेवनतोऽस्य ये गुणा नश्यन्ति तद्यथा ॥
“गुरुत्वं लाघवाच्छैत्यं चौष्ण्यमम्लस्वभावतः ।
माधुर्य्यं मार्द्दवं तैक्ष्ण्यात् प्रसादञ्चाशुभावनात् ॥
रौक्ष्यात् स्नेहं व्यवायित्वात् स्थिरत्वं श्लक्ष्णतामपि ।
विकासिभावात् पैच्छिल्यं वैशद्यं सान्द्रतान्तथा ॥
सौक्ष्म्यान्मद्यं विहन्त्येवमोजसः स्वगुणैर्गुणान्” ।
“रसधात्वादिमार्गाणां सत्त्वबुद्धीन्द्रियात्मनाम् ।
प्रधानस्यौजसश्चैव हृदयस्थानमुच्यते” ॥
“नैवं विघातं जनयेन्मद्यं पैष्टिकमोजसः ।
विकाश-रूक्ष-विशदा गुणास्तत्र हि नोल्बणाः” ॥

इति च चरके चिकित्सास्थाने । १२ अः ॥

“ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम् ।
विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम् ॥
देहस्यावयवस्तेन व्याप्तो भवति देहिनाम् ।
तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणाम् ॥
अभिघातात् क्षयात्कोपाच्छोकाद्ध्यानाच्छ्रमात् क्षुधः ।
ओजः संक्षीयते ह्येभ्यो धातुग्रहणनिःसृतम् ।
तेजः समीरितं तस्माद्विस्रंशयति देहिनः” ॥

इति सूत्रस्थाने । १५ अः । सुश्रुतेनोक्तम् ॥)

ओड़वः, पुं, पञ्चस्वरयुक्तरागः । स तु ऋ-प-वर्ज्जितः । ष-ग-म-ध-नि-युक्तः । यथा मल्लारादयः । इति संगीतदामोदरः ॥ (यदुक्तं संगीतरत्नाकरे स्वराध्याये जातिप्रकरणे ।

“वान्ति यान्त्युडवोऽत्रेति व्योमोक्तमुडवं बुधैः ।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा ।
ओड़वी सास्ति येषाञ्च स्वरास्तेऽोड़वा मताः” ॥

“औड़वा मताः” इति क्वचित् पाठः ॥ “उड़वः नक्षत्राणि वान्ति यान्ति यस्मिन् इत्युड़वं व्योम, तच्च भूतेषु पञ्चमम् । तेन पञ्चसङ्ख्या लक्ष्यन्ते । औड़वी सङ्ख्या विद्यते येषां स्वराणां ते औड़वाः पञ्चस्वराः” इत्यादिसिंहभूपालटीका ॥)